ध्यानश्लोकाः Authored by Madhusudana Saraswati

१. ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं । व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम् ॥
अद्वैतामृतवर्षिणीं भवगतीमष्टादशाध्यायिनीम् । अम्ब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम् ॥ - गीता ध्यानम्

२. नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र । येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ - व्यासाय नमः

३. प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये । ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ - कृष्णाय नमः

४. सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः । पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ - गीतामृतम् दुग्धम्

५. वसुदेवसुतं देवं कंसचाणूरमर्दनम् । देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

६. भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोपला । शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ॥
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी । सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः ॥

७. पाराशर्यवचः सरोजममलं गीतार्थगंधोत्कटं । नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् ॥
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा । भूयाद्भारतपंकजं कलिमलप्रध्वंसिनः श्रेयसे ॥

८. मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् । यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

९. यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैः वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुःसुरासुरगणा देवाय तस्मै नमः ॥



ध्यानश्लोकः

१. ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं । व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम् ॥
अद्वैतामृतवर्षिणीं भवगतीमष्टादशाध्यायिनीम् । अम्ब त्वामनुसंदधामि भगवद्गीते भवद्वेषिणीम् ॥ - गीता ध्यानम्



पदविभागः

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम्
४-१ २-१ ३-१ ३-१ ० ३-१ २-१ ३-१ ७-१ २-१

अद्वैतामृतवर्षिणीं भवगतीम् अष्टादशाध्यायिनीम् अम्ब त्वाम् अनुसंदधामि भगवद्गीते भवद्वेषिणीम् ।
२-१ २-१ २-१ स-१ २-१ उ.पु-१ स-१ २-१

अन्वयः

हे अम्ब ! हे भवद्गीते ! भगवता नारायणेन स्वयं पार्थाय प्रतिबोधितां पुराणमुनिना व्यासेन महाभारतम् मध्ये ग्रथितां अद्वैतामृतवर्षिणीं भगवतीं अष्टादशाध्यायिनीं भवद्वेषिणीं त्वाम् (अहम्) अनुसंदधामि ।

प्रतिपदार्थः

हे अम्ब - मातः = O Loving Mother !, भगवद्गीते = हे भगवद्गीते = O Bhagavada Gita, भगवता नारायणेन = विष्णुना, स्वयं - स्वेच्छम् = by Lord Nayanana himself, पार्थाय = अर्जुनाय, प्रतिबोधितां = उपदर्शितां - विवृतां - परिभाषितां = taught, व्यासेन पुराणमुनिना = व्यासमुनिना = by Vyasa, ग्रथितां = रचिताम् = incorporated, मध्ये = केन्द्रे, महाभारतम्, अद्वैतामृतवर्षिणीं (अमृतवर्षिन्) = अद्वैतम् अमृतम् = कर्मधारय, अद्वैतामृतम् यया वर्षितम् सा ताम् – बहुव्रीहिः = showering down the nectar of Advaita, भवगतीम् = भद्रां मातरम् = Blessed Mother, अष्टादशाध्यानिनीम् = अष्टादश अध्यायाः - कर्मधारयः, अष्टादशाध्यायाः यस्याः सा ताम् - बहुव्रीहिः = consisting of eight chapters, भवद्वेषिणीम् (द्वेषिन्) = भवः (जन्म) यस्याः द्वेषी (जुगुप्सा, अरुचिः) सा ताम् – बहुव्रीहिः = destroyer of rebirth, त्वाम् = to you,
अनुसंदधामि = अनु+संदधामि = ध्यानम् करोमि = I constantly meditate,

तात्पर्यम्

भगवान् नारायणः स्वयं गीतां अर्जुनं उपादिशत् (बोधितवान्, उपदिष्टवान्) । तेन उपदेशेन अर्जुनः बुद्धः अभवत् । महामुनिः व्यासः महाभारतम् मध्ये एतां गीतां रचितवान् । भद्रा माता सा अद्वैतामृतवर्षा करोति । अपि च सा पुनर्जन्म निवारयति । तस्याः अष्टादशाध्यायाः सन्ति । हे मातः भगवद्गीते ! एतादृशीं त्वाम् अहम् सर्वदा (निरन्तरम्) ध्यायामि । गीता माता अस्ति । महात्मन् गांधीजीः अवदत् - “गीता मम माता अस्ति । यदा अहम युवकः आसीत् तदा मम माता मृता अभवत् । किन्तु मम समीपे गीता अस्ति । अतः अहं मम मातुः अनुपस्थितिं नानुभवामि ।“ इति ।

Om ! O Bhagavad Gita with which Partha was enlightened by Lord Narayana himself and which was incorporated in the Mahabharata by the ancient sage Vyasa, O The Blessed Mother, the destroyer of rebirth, showering down the nectar of Advaita, and consisting of eighteen chapters – upon Thee, O Bhagavad Gita ! O loving Mother ! I constantly meditate.

महर्षिव्यासाय नमः

२. नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र । येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ - व्यासाय नमः

महाभारततैलपूर्णः ज्ञानमयः प्रदिपः




पदविभागः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| नमः | अस्तु | ते | व्यास | विशालबुद्धे | फुल्लारविन्दायतपत्रनेत्र | येन | त्वया | भारततैलपूर्णः | प्रज्वालितः | ज्ञानमयः | प्रदीपः |
| १-१ | | ४-१ | स-१ | स-१ | स-१ | ३-१ | ३-१ | १-१ | १-१ | १-१ | १-१ |

फुल्ल (blown, opened wide) अरविन्द (lotus) अयत (unrestrained) पत्र (petal) नेत्रम्

अन्वयः

हे विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र व्यास ते नमः अस्तु । येन त्वया भारततैलपूर्णः ज्ञानमयः प्रदीपः प्रज्वालितः (अस्ति)

प्रतिपदार्थः

हे विशालबुद्धे = विशाला बुद्धिः यस्य सः - बहुव्रीहिः = O Of mighty intellect !
हे फुल्लः अरविन्दः = फुल्लः अरविन्दः - कर्मधारयः = blown lotus
फुल्लअर्विन्दः अयतः = फुलारविन्दः अयतः - कर्मधारयः = fully blown lotus
फुल्लारविन्दायतपत्र = फुल्लारविन्दायतम् पत्रम्- कर्मधारयः = fully blown lotus petal
फुल्लारविन्दायतपत्रनेत्रम् = फुल्लारविन्दायतपत्रमिव नेत्रम् - उपमानोत्तरपदः कर्मधारयः = eye like petal of fully grown lotus फुल्लारविन्दायतपत्रनेत्र = फुल्लारविन्दायतपत्रनेत्रम् यस्य सः = one with large eyes like the petals of fully-grown lotus, व्यास = हे व्यास, ते नमः अस्तु = ते नमः भवतु = Salutation to Thee, येन त्वया = by whom you,
भारततैलम् = भारतम् एव तैलम् - अवधारणापूर्वपदः कर्मधारयः = Mahabhaarata is Oil indeed.
भारततैलपूर्णः = महाभारतम् तैलेन पूर्णः - तृतीयातत्पुरुषः = Fillied with Mahabharata oil
ज्ञानमयः प्रदीपः = lamp of wisdom, प्रज्वालितः = was lit.

तात्पर्यम्

हे व्यास ! ते नमस्करोमि । तव विशाला बुद्धिः अस्ति । तव नेत्रे कमलपत्राणि इव फलिते स्तः । त्वं महाभारतम् रचितवान् । महाभारतमध्ये भगवद्गीता अस्ति । यत् अन्यत्र अस्ति तत् महाभारते अस्ति । यत् महाभारते नास्ति तत् कुत्रापि नास्ति एवम् उक्तम् । तत्र संपूर्णम् ज्ञानम् अस्ति । महाभारतम् ज्ञानदीपः अस्ति । अतः त्वया महाभारतरूपेण तैलेन पूर्णः ज्ञानदीपः प्रज्वालितः अस्ति ।

Salutation to Thee O Vyasa, of mighty intellect and with eyes large like the petals of full-blown lotus, by whom was lit the lamp of wisdom, full of the Mahabharata oil.

३.  प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये। ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ - कृष्णाय नमः

पदविभागः

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ।
४-१ ४-१ ४-१ ४-१ ४-१ १-१
तोत्र वेत्र एक पाणये गीता अमृत दुहे

अन्वयः

प्रपन्नपारिजाताय तोत्रवेत्रैकपाणये ज्ञानमुद्राय गीतामृतदुहे कृष्णाय नमः ।

प्रतिपदार्थः

प्रपन्नाय पारिजातः - प्रपन्नपारिजातः - चतुर्थीतत्पुरुषः = Like wish-granting tree to one who takes refuge
तोत्र (whip) वेत्र (handle) - तोत्रवेत्र = whip handle
एकः पाणिः - विशेषणपूर्वपदः कर्मधारयः = one hand
तोत्रवेत्रम् एकपाणौ यस्य सः - तोत्रवेत्रैकपाणिः - व्यधिकरणः बहुव्रीहिः = One with Goad and Cane in one hand
ज्ञानमुद्रः - ज्ञानं मुद्रा यस्य सः - = one whose hand is held in Knowledge pose.
गीता एव अमृतम् - गीतामृतम् - अवधारणापूर्वपदः कर्मधारयः = Gita itself is Amrut.
गीतामृतम् दोग्धि इति - गीतामृतधुक् (धुग्) - उपपदसमासः/कृदन्तः = Milker of GitaAmruta

तात्पर्यम्

कृष्णाय नस्करोमि । तस्य दक्षिणहस्तः ज्ञानमुद्रायुक्तः अस्ति । अन्यस्मिन् पाणौ तोत्रं च वेत्रं च अस्ति । पारिजातः वृक्षः यः तस्य समीपे गच्छति तस्य इच्छितानि कामानि पूरयति । तथा एव कृष्णः यः तस्य शरणं गच्छति तस्य कामानि पूरयति । अपि कृष्णः गीतामृतं दोग्घि । एतादृशाय कृष्णाय मम नमः ।

I bow to Krishna who is like wish full filing tree to one who surrenders to him, whose right has is raised in Jnana-mudra, who has whip handle in the other hand to drive the chariot of Arjuna, and who is milker of the Gita-Nectar.

ज्ञानमुद्रामहत्वम्



पश्यतु मुद्रायां किम् अस्ति । तत्र अङ्गुष्ठः तर्जनीं अग्रे स्पर्शति । सः तर्जन्याः संम्मुखे अस्ति । केवलम् मानवः एवं कर्तुं शक्नोति । अन्यः कोपि जन्तुः एवं कर्तुं न शक्नोति । मानवानाम् एतावत् सामर्थ्यम् अति महत्वपूर्णम् अस्ति । एतेन सामर्थ्येन मानवः वस्तूनाम् उपयोगं कर्तुम् शक्नोति । मानवः वस्तूनाम् प्रयोगेन ज्ञानं प्राप्नोति । एवम् ज्ञानमुद्रा ज्ञानसंपादनस्य प्रतिनिधित्वम् करोति । अपरा वा परा विद्या पवित्रा एव । ज्ञानमुद्रा समग्रं ज्ञानान्वेषणम् विवृणोति । ज्ञानात् लक्ष्मीसम्पादनम् भवति । सरस्वती शुद्धम् ज्ञानम् अस्ति । लक्ष्मीः प्रयुक्तम् ज्ञानम् अस्ति । ज्ञानाय पठनेन वयम् सरस्वत्याः विध्यार्थिनः भवामः । अपि च कठिनेन प्रयत्नेन च प्रयुक्तेन ज्ञानेन च वयम् लक्ष्मीं पुजामः ।

In the Jnana Mudra, the thumb touches the top of the index finger. This is very important capability give to human beings, no other creature has this capability. With thumb co-operating with other fingers, human beings are able to manipulate things (instruments, etc), create new things and get knowledge. Thus this mudra represents search for knowledge, both secular and spiritial. Both kinds of knowledge are sacred. Applying the knowledge, human beings get wealth. Saraswati who is the diety of knowledge is pure science while wealth (Lakshmi) is applied science. By working hard to get knowledge we become students of Saraswati. By applying knowledge (action), improving efficiency, team work – thus creating wealth for the upliftment of self and society, we worship Lakshmi.

## तपसः महत्वम्

ज्ञानान्वेषणम् तपः अस्ति । ज्ञानार्थाय यत् कष्टं भवति् तत् न विचार्य ज्ञानप्राप्त्यार्थं सततं प्रयत्नम् कुर्यात् ।
यदि ज्ञाने प्रीतिः अस्ति तर्हि किम् कष्टम् । ज्ञानान्वेषणं तपः अस्ति । मनश्च इन्द्रियाणां च एकाग्रं तप उच्यते
शङ्कराचार्यः-तैतीर्योपनिषद-टिप्पणिका । तपः ज्ञानं च सहयोगिनौ स्तः । तपः स्वाध्यायः च सहयोगिनौ (सहवर्तिनौ) स्तः
। एवम् भूत्वा ऋषयः आत्मनं अन्वेषवन्तः । अपि वैज्ञानिकाः संशोधनानि कृतवन्तः
बहवो ज्ञानतपसापुता मद्भावमागताः - भ.गी-४-१० । तपसा ब्रह्म विजिज्ञाषस्व - शङ्कराचार्यः-तैतीर्योपनिषद-टिप्पणिका ।
तपः स्वाध्याय निरतः नारदः - रामायणस्य आरम्भे ।

एवं ज्ञानमुद्रा अस्मान् तपः च स्वाध्यायं च आचरयितुम् प्रेरयति । सा तपस्स्वाध्याययोः संज्ञा ।

Search for knowledge is Tapas. If there is love for knowledge, we do not think about the difficulties on the way. Tapas is concentration of mind and senses energies (according to Samkaracharya). Knowledge and tapas go together. Rishis have overcome distractions and realized Atman with constant effort. Many scientists have pierced the secrets of nature and made discoveries with hours and hours of hard work. Many have been purified with tapas for knowledge. These purified ones have reached God (BG-4-10). Know Brahman by Tapas (according to Sankaracharya).

This is the concept of Jnana-mudra behind which lie study and tapas. Thus the knowledge pose represents study and tapas.

४. सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः । पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥ - गीतामृतम् दुग्धम्



पदविभागः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| सर्वः | उपनिषदः | गावः | दोग्धा | गोपालनन्दनः | पार्थः | वत्सः | सुधीः | भोक्ता | दुग्धं | गीतामृतं | महत् ॥ |
| १-१ | १-३(द-पु) | १-३(पु) | १-१(पु-ऋ) | १-१ | १-१ | १-३ | १-१(पु-ई) | १-१ | १-१ | १-१ | १-१ |

अन्वयः

सर्वोपनिषदः गावः (सन्ति) | गोपालनन्दनः दोग्धा (अस्ति) | पार्थः वत्सः (अस्ति) | सुधीः भोक्ता (अस्ति) |
गीतामृतं महत् दुग्धम् अस्ति ।

प्रतिपदार्थः

सर्वोपनिषदः - सर्वः उपनिषदः - विशेषणपूर्वपदः कर्मधारयः = all Upanishads गावः = cows
(cows in the form of all Upanishads)
गोपालः - गाम् पालयति इति - उपपदसमासः – keeper of cow, गोपालः नन्दनः - विशेषणपूर्वपदः कर्मधारयः = keeper of cow and rejoicing,
दोग्धा = miker, पार्थः वत्सः = Parth is calf, सुधीः भोक्ताः = pious, wise, intelligent person is drinker.
गीतामृतं महत् दुग्धम् = great milk in the form of Gita-Nectar

तात्पर्यम्

सर्वः उपनिषदः गावः सन्ति । तेभ्यः गोभ्यः दोग्धा गोपालनन्दनः पार्थाय गीतामृतरूपम् दुग्धम् दोग्धि ।
तत् महत् दुग्धं पूतः बुद्धिमान् पुरुषः पिबति । दुग्धम् अस्माकम् बलम् ददाति । एतस्य दुग्धस्य पानेन अस्माकम्
चारित्र्यम् च कार्यशक्तिः च सेवाभावना च फलति । अद्य आरभ्य दुग्धमं केवलं न पूजाम तु पिबाम । अद्य आरभ्य गीतां
पठाम अवगच्छाम तदनु स्वजीवनं पालयाम (वचनं सुलभम् आचरणं तु कष्टम्) ।

Gita is described as the essence of the Upanishads. All Upanishads are cow;. rejoicing cow-heard boy Sri Krishna is the milker; Parth is the calf; men and women of purified intellect are the drinkers; and the supreme nectar, Gita, is the milk. By drinking milk we get strength. Let us develop character, ability to work and spirit of service. Let us drink and digest the milk instead of worshiping it starting today.

५. वसुदेवसुतं देवं कंसचाणूरमर्दनम् । देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥




पदविभागः

वसुदेवसुतम् देवम् कंसचाणूरमर्दनम् देवकीपरम् आनन्दम् कृष्णम् वन्दे जगत् गुरुम् ।

अन्वयः

अहम् वसुदेवसुतं देवं कंसचाणूरमर्दनं देवकीपरमानन्दं जगद्गुरुं कृष्णं वन्दे ।

प्रतिपदार्थः (अन्वयार्थः)

वसुदेवसुतम् - वसुदेवस्य सूतम् - षष्ठीतत्पुरुषः = Vasudeva’s son, देवम् = to God

कंसः च चाणूरः च - कंसचाणूरौ - इतरेतरद्वन्द्वः = Kamsa and Chaanura

कंसचानूरौ येन मर्दनौ सः तम् - बहुव्रीहिः = one who has killed Kamsa and Chaanura

परम् आनन्दम् - परमानन्दम् - विषेणपूर्वपदः कर्मधारयः, देवक्याः परमानन्दः यः सः तम् - केवकीपरमानन्दम् - बहुव्रीहिः = one who is supreme bliss of Devaki, जगतः गुरुः यः सः तम् - बहुव्रीहिः = one who is Guru of the whole world,

कृष्णं वन्दे = I bow down to Krishna.

तात्पर्यम्

कृष्णः वसुदेवस्य पुत्रः अस्ति । सः देवः अस्ति । सः कंसं च चाणूरं च मारितवान् । सः मात्रे देवक्यै परमम् आनन्दम् ददाति । कृष्णः केवलम् एकाय कुलाय वा एकाय देशाय वा एकाय गणाय वा न अवतरितवान् । सः प्रपञ्चाय जगते आगतः । तस्य उपदेशः समग्राय मानवाय अस्ति । अतः सः जगद्गुरुः एव अस्ति । एतादृशं कृष्णं अहं वन्दनं करोमि ।

The divine son of Vasudeva, the destroyer of (the evil doers) Kamsa and Chanura, the supreme bliss of mother Devaki – I salute that Krishna, the guru of the world.

६. भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोपला । शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ॥
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी । सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः ॥



पदविभागः

सोत्तीर्णा = सा उत्तीर्णा

अन्वयः

भीष्मद्रोणतटा जयद्रथजला गांधारनीलोपला शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी सा रणनदी पाण्डवै उत्तीर्णा (अभवत्) खलु । केशवः कैवर्तकः (आसीत्) ॥

प्रतिपदार्थः (अन्वयार्थः)

भीषः च द्रोणः च - भीष्मद्रोणौ - इतरेतरद्वन्द्व = Bhima and Drona, भीष्मद्रोणौ यस्याः तटौ सा - भीष्मद्रोणतटा - बहुव्रीहिः = one whose banks are Bhima and Drona, जयद्रथः जलः यस्याः सा - जयद्रथजला - बहुव्रीहिः = one whose water is Jayadratha, नीलः उपलः - विशेषणपूर्वपदः कर्मधारयः - नीलोपलः = Black stone, गांधारः नीलोपलः इव - गांधारनीलोपलः उपमानोत्तरपदः कर्मधारयः = Gandhar is like black stone, गांधारनीलोपला यस्याः सा - गांधारनीलोपला - बहुव्रीहिः - Gandhara is whose black large stone, शल्यः ग्राहवत् इव - विशेषणोत्तरपदः कर्मधारयः - शल्यग्राहवत् = Shalya is like Shark, शल्यग्राहवत् यस्याः सा - बहिव्रीहिः शल्यग्राहवती - Shalya is whose shark, कृपेण वहनी = Krupa is its under currents, वेल = large, high number, आकुल = agitated, uneasy, कर्णेन वेलाकुला = agitated by Karna, अश्वत्थामविकर्ण = अश्वत्थामः च विकर्णः च - अश्वत्थामविकर्णौ - इतरेतरद्वन्द्व, धोरः मकरः = विशेषणपूर्वपदः कर्मधारयः = Terrible crocodile, अश्वत्थामविकर्णौ यस्याः घोरमकरौ सा - अश्वत्थामविकर्णघोरमकरा - बहुव्रीहिः = Ashvatthama and Vikarna are whose terrible crocodiles. दुर्योधनः यस्याः आवर्तिनी सा - बहिव्रीहिः - Duryodhana is whose whirlpool, रणः नदी इव - उपमानोत्तरपदः कर्मधारयः = battle field is like river, पाण्डवैः उत्तीर्णा खलु = was indeed crossed by the Pandavas. Reason is केशवः कैवर्तकः = Lord Krishna was the ferry-man (guide)

तात्पर्यम्

एका नदी अस्ति । तस्याः द्वौ तटौ स्तः । एकस्य नाम भीष्मः अन्यस्य नाम द्रोणः अस्ति । जयद्रथः तस्याः जलः अस्ति । कृपाचार्यः तां वहयति । गांधारः तस्याः कृष्णशीला अस्ति । शल्यः तत्र बृहत् पशुः अस्ति । कर्णः तस्याः तरङ्गः अस्ति । अश्वत्थामा विकर्णः च तस्याः मकरौ स्तः । दुर्योधनः तस्याः आवर्तनः अस्ति । एतादृशीं नदीं पाण्डवाः तरितवन्तः एव । कारणम् तेषां नायकः केशवः आसीत् इति । जीवननद्यां अपि बहूनि कठिनानि सन्ति । बहवः विध्नाः सन्ति । यदि कृष्णः अस्माकं मार्गदर्शनं करोति तर्हि वयं विध्ननदीं तरितुं शक्नुमः । तत् मार्गदर्शनम् भगवते कृषणे उक्ता गीतायां अस्ति । वयम् अन्वेषणं कुर्वामः ।

The battle river, with Bhishma and Drona as its banks, Jayadratha as its waters, the king of Gandhara as the black stone, Salya as the shark, Kripa as its currents, Karna its waves, Ashvatthama and Vikarna as its terrible crocodiles, and Duryodhana as the whirlpool in it. This battle river was indeed crossed by the Pandavas with Krishan as the ferry-man (fisherman).

७. पाराशर्यवचः सरोजममलं गीतार्थगंधोत्कटं। नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् ॥
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा। भूयाद्भारतपंकजं कलिमलप्रध्वंसिनः श्रेयसे ॥




महाभारतपङ्कजम्

पदविभागः

पाराशर्यवचः सरोजम् अमलम् गीतार्थगंधोत्कटम् नाना आख्यानककेसरम् हरिकथासंबोधनाबोधितम्
१-१ १-१ १-१ १-१ ० १-१ १-१

लोके सज्जनषट्पदैः अहरहः पेपीयमानम् मुदा भूयात् भारतपंकजम् कलिमलप्रध्वंसि नः श्रेयसे ।
७-१ ३-३ ० १-१ ३-१ प्र.पु-१-वि.लि १-१ १-१ ४-३ ४-१

अन्वयः

पाराशर्यवचः सरोजम्, अमलम्, गीतार्थगंधोत्कटम्, नाना आख्यानककेसरम्, हरिकथासंबोधनाबोधितम्,
लोके सज्जनषट्पदैः अहरहः मुदा पेपीयमानम्, कलिमलप्रध्वंसि, भारतपंकजम् नः श्रेयसे भूयात् ।

प्रतिपदार्थः (अन्वयार्थः)

पाराशरः - पराशरस्य अपत्यं पुमान् – Parasara's son - Vyaasa (व्यासः), पाराशर्यवचः - पाराशरस्य वचः = words of Vyaasa = advise of Vyaasa, in the form of lake, सरोजम् = born in the lake, अमलम् = निर्मलम् = clean, spotless, गीतार्थः - गीतायाः अर्थः - षष्ठी-त.पु = Gita's sense, गन्धोत्कटम् - गन्धम् उत्कटम् - वि.उ.प-कर्मधारयः = strong sweet fragrance, गीतार्थगंधोत्कटम् - गीतार्थः गन्धोत्कटः - वि.उ.प-कर्मधारय - = Gita is its strong sweet fragrance, नानाख्यानक - नाना आख्यानक – वि.उ.प-कर्मधारयः = various short stories, नानाख्यानककेसरम् - नानाख्यानकम् केसरम् - वि-उ.प-कर्मधारयः - = various stories are its stamens, हरिकथा - हरेः कथा - षष्ठी-त.पु = Hari's story, हरिकथासंबोधना - हरिकथा संबोधना - वि.उ.प-कर्मधारयः = = awakening Hari's story, हरिकथासंबोधनाबोधितम् - हरिकथासंबोधनया बोधितम् – तृतीया-त.पु = opened (bloomed) by awakening Hari's story, लोके = प्रपञ्चे = in the world, सज्जनषट्पदैः - सज्जनः षट्पदः - वि-उ.प-कर्मधारयः = by the bees of good and pure in the world, अहरहः = everyday, पेपीयमानम् = drunk, मुदा = joyously, कलिमल - कलि एव मल - अवधारणा-पू.प-कर्मधारयः = Kali indeed is taint, कलिमलप्रध्वंसि - कलिमलस्य प्रध्वंसि - षष्ठी-त.पु = destroyer of taint of Kali, महाभारतपङ्कजम् - महाभारतम् पङ्कजम् - वि-उ.प-कर्मधारयः = Lotus of Mahabharata, नः श्रेयसे भूयात् = may be of supreme good for us.

तात्पर्यम्

पारासरस्य वचः सरः इव अस्ति । तस्मिन् सरे निर्मलम् महाभारतम् पङ्कजम् उद्भवति । पङ्कजस्य उत्तरतमः गंधः गीतार्थः अस्ति । तत्र नाना प्रकाराणि आख्यानकानि केसरानि इव सन्ति । तत् पङ्कजम् हरिकथाबोधनेन प्रफुल्लितम् अस्ति । प्रपञ्चे भ्रमराः इव सज्जनाः तस्मात् रसं आनन्देन प्रतिदिने पिबन्ति । तत् कलिपापानि नाशयति । एतादृशम् महाभारतं कमलम् अस्मभ्यं श्रेयसे भूयात् ।

May the taintless lotus of the Mahabharat, growing on the waters of the words of Parasara's son (Vyasa), having Gita as its strong sweet fragrance, with many narratives as its stamens, fully opened by the discourses on Hari, and drunk joyously every day by the bees of the good and the pure in the world, destroyer of the taint of Kali – be productive of the supreme good to us.

८. मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् । यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥

पदविभागः

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् यत् कृपा तम् अहं वन्दे परम् आनन्दम् माधवम्
२-१ २-१ २-१ १-१ २-१ १-१ १-१ २-१ २-१ २-१ २-१

अन्वयः

यत् (यस्य) कृपा मूकं वाचालं करोति, पङ्गुं गिरिम् लङ्घयते, तम् परम् आनन्दम् माधवम् अहं वन्दे

प्रतिपदार्थः (अन्वयार्थः)

यत् (यस्य) कृपा मूकं वाचालं करोति = whose grace makes the dumb eloquent, पङ्गुं गिरिम् लङ्घयते = makes the cripple cross mountain, तं परम् आनन्दं माधवम् अहं वन्दे = to that all-blissful Madhava, I salute.

तात्पर्यम्

भगवतः कृपा यः वक्तुं न शक्नोति तं वाचालं करोति । अपि यः चलितुं न शक्नोति तं पर्वतस्य लङ्घनं करोति । सः माधवः परमानन्दः अस्ति । तस्मै माधवाय अहं नमस्करोमि ।

I salute that all-blissful Madhava whose grace makes the dumb eloquent and the cripple cross mountain.

९. यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैः वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुःसुरासुरगणा देवाय तस्मै नमः ॥

पदविभागः

यं ब्रह्मा वरुणः इन्द्रः रुद्रः मरुतः स्तुन्वन्ति दिव्यैः स्तवैः वेदैः सअङ्गः पदः क्रमः उपनिषदः (तैः) गायन्ति यं
२-१ १-१ १-१ १-१ १-१ १-१ ३-३ ३-३ ३-३ १-१ १-१ १-१ १-१ २-१
सामगाः ध्यानावस्थितः तद्गतेन मनसा पश्यन्ति यं योगिनः यस्य अन्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः
१-३ १-१ ३-१ ३-१ २-१ १-३ ६-१ २-१ ० २-१ १-३ ४-१ ४-१ १-१

अन्वयः

यं ब्रह्मा वरुणः इन्द्रः रुद्रः मरुतः दिव्यैः स्तवैः स्तुन्वन्ति । यं सामगाः वेदैः सअङ्गः पदः क्रमः उपनिषदः (तैः) गायन्ति । यं योगिनः ध्यानावस्थिततद्गतेन मनसा पश्यन्ति । सुरासुरगणाः यस्य अन्तं न विदुः ।
देवाय तस्मै (मम) नमः (अस्ति) ।

प्रतिपदार्थः (अन्वयार्थः)

यं = whom ब्रह्मा वरुणः इन्द्रः रुद्रः मरुतः = Brahma Varuna, Indra, and Rudra, दिव्यैः स्तवैः स्तुन्वन्ति = praise with divine hymns, यं = whom सामगाः - सामस्य गाः - षष्ठी-त.पु = singers of Sama, वेदैः = by Vedas, सअङ्गः पदः क्रमः उपनिषदः = with their full complement of parts, consecutive sections, and Upanisada, गायन्ति = sing, यं = whom, योगिनः = Yogis, ध्यानावस्थित - ध्यानेन अवस्थितः - तृतीया-त.पु = perfected by meditation, तद्गतेन - तस्मिन् गतः - सप्तमी-त.पु = absorbed in him, मनसा = with mind, पश्यन्ति = see, सुरासुरगणाः - सुराः च असुरगणाः - इतरेतरः द्वन्द्वः = the hosts of Devas and Asuras, यस्य अन्तं = whose limits, न विदुः = do not know, देवाय तस्मै = to that, Deva, नमः = Salutation.

तात्पर्यम्

ब्रह्मा वरुणः इन्द्रः रुद्रः मरुतः च दिव्यैः स्त्रोत्रैः देवस्य स्तवनं कुर्वन्ति । तं देवं ये सामवेदस्य गानं कुर्वन्ति ते सामगाः वेदैः अङ्गेन पदेन क्रमेण उपनिषदेन च सह गायन्ति । योगिनः ध्यानेन मनः एकाग्रं कुर्वन्ति । इदृशं मनः देवमग्नः भवति । इदृशेन मनसा योगिनः देवं दृश्टुम् शक्नुवन्ति । सुराः च असुराः च तस्य देवस्य अन्तं न जानन्ति । इदृशाय देवाय अहं नमस्करोमि ।

Salutation to that Divine Being whom Brahma, Varuna, Indra, Rudra, and the Maruts praise with divine hymns, Whom the singers of Sama sing by the Vedas, with their full complements of parts, consecutive sections, and Upanishads, Whom the yogis see with their minds absorbed in him through perfection in meditation, and Whose limits the hosts of Devas and Asuras know not.

## Sankaracharya's Introduction to His Gita Commentary

१. नारायणः परोऽव्यक्तात् अण्डमव्यक्तसम्भवम् । अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ।

पदविभागः

नारायणः परः अव्यक्तात् अण्डम् अव्यक्तसम्भवम् अण्डस्य अन्तः तु इमे लोकाः सप्तद्वीपा च मेदिनी ।
१-१ १-१ ५-१ १-१ १-१ ६-१ ० ० १-३ १-३ १-१ ० १-१

अन्वयः

नारायणः अव्यक्तात् परः (अस्ति) । अण्डम् अव्यक्तसम्भवम् (भवति) । अण्डस्य अन्तः तु इमे लोकाः (सन्ति) ।
(अपि अण्डस्य अन्तः) सप्तद्वीपा मेदिनी च (अस्ति) ।

प्रतिपदार्थः (अन्वयार्थः)

नारायणः अव्यक्तात् परः = Narayana is beyound the Unmanifest (Prakriti), अण्डम् = The Cosmic Egg,
अव्यक्तसम्भवम् - अव्यक्तात् सम्भवम् = षष्ठी-त.पु = born of the Unmanifest, अण्डस्य अन्तः = inside of the Egg consists of , इमे लोकाः = these worlds, च सप्तद्वीपा - सप्तद्विपाः यस्यां सा मेदिनी - सप्तमी-बहुव्रीहिः = and the earth with its seven island-contenents.




तात्पर्यम्

नारायणः सर्वस्य प्रभवः (मूलः, योनिः, बीजः मुखः) अस्ति । नारायणः जगतः मूलः अस्ति । अतः जगत् आध्यात्मिकम् अस्ति बुद्धिमत् अस्ति । व्यक्तप्रकृतिः अव्यक्तप्रकृतिः च इति द्विधा प्रकृतिः अस्ति । दृष्टिगोचरा प्रकृतिः व्यक्तप्रकृतिः अगोचरा प्रकृतिः अव्यकप्रकृतिः अस्ति । नारायणः अव्यक्तात् परः अस्ति । अव्यकतात् व्यक्तप्रकृतिः उद्भवति । सः सर्वस्य प्रभवः नायकः स्वामी अस्ति । सः जगतः बीजप्रदः पिता अस्ति - भ.गी १४-३, १४-४ । सर्वम् तस्मात् उद्भवति तस्मिन् तिष्ठति । अपि च युगक्षये तस्मिन् एव सर्वम् प्रलयति - भ.गी ७-६, ८-१८, ९-१८ ।

यतः सर्वाणि भूतानि भवन्ति आदियुगागमे । यस्मिन् च प्रलयं यान्ति पुनरेव युगक्षये । - विष्णुसहस्रनाम्
वासुदेवः सर्वम् इति ज्ञानवान् मां प्रपद्यते । - भ.गी - ७-१९

Narayana (the Supreme Divine Being) is beyond the avyakta (unmanifested Nature), the Cosmic Egg has come out of the avyakta. Within the Cosmic Egg are these universes including the earth with its seven island-continents.

Cosmology's Evolutionary Sequence

व्यक्तप्रकृतितेः ब्रह्माण्डः (जगत् cosmic evolution) भूतारब्धः (organic evolution) मानवः च इति उद्विकासः (evolution) भवति । मानवस्य धार्मिकः नैतिकः आध्यात्मिकः च इति उद्विकासः भवति ।

Vedantic cosmology says that the whole Brahmanda has come from Brahman, exists in Brahman, and gets dissolved in the Brahman at the end of a cosmic cycle. It has come from Brahman in a particular orderly fashion, from an unmanifested state to a manifested state. This manifestation follows a certain evolutionary sequence; cosmic evolution, organic evolution, human – ethical, moral, spiritual – evolution.

The Divine Narayana is the personal aspect of the Impersonal-Personal Brahman, which is of the nature of Infinite Pure Consciousness, one and non-dual.

## द्विविधो हि वेदोक्तो धर्मः – १. प्रवृत्तिलक्षणः २. निवृत्तिलक्षणः च ।

प्रथमं भगवान् जगदं सृष्टवान् । ततः जगतः स्थितिं (well-being) चिकीर्षुः सः मरीचादीन् प्रजापतीन् सृष्टवान् । सः तान् वेदोक्तं प्रवृत्तिलक्षणं धर्मं (laws of work) ग्राहयामास (imparted) । ततः अन्यान् च सनकसनन्दनादीन् उत्पाद्य निवृत्तिलक्षणं ज्ञानवैराग्यलक्षणं धर्मं (laws of cessation of work – inward meditation - marked by knowledge and detachment) ग्राहयामास । एषः द्विविधो - प्रवृत्तिलक्षणः निवृत्तिलक्षश्च वेदोक्तो धर्मः जगतः स्थितिकारणम् अस्ति । प्राणिनां साक्षात् अभ्युदयनिःश्रेयसहेतुः (in the persuit of socio-economic welfare and spiritual freedom) यः स धर्मः वर्णिभिः (human classes-based on their inclination) आश्रमिभिः (life states) श्रेयोर्थिभिः (desirous of welfare) अनुष्ठीयमानः (was cultivated) । किन्तु दीर्घेण कालेन अनुष्ठातारः (practitioners of the law of righteousness) कमातुराः (dominated by cravings) अभवन् । अतः तेषां विवेकज्ञानम् (discriminative knowledge) हीयमानम् (declined) अभवत् । तेन कारणेन अधर्मः धर्मम् अभिभूय (surpassing) प्रवर्धमानः अभवत् । अतः जगतः स्थितिं परिपिपालयिषुः आदिकर्ता नारायणः भौमस्य ब्रह्मणः (of spiritual power) ब्राह्मणत्वस्य (of state of Brahmanhood-spirituality) रक्षणार्थं देवक्यां वसुदेवस्य अंशेन कृष्णः किल (as Krishna) सम्बभूव (born by the aspect of Himself) । ब्राह्मणत्वस्य हि रक्षणे रक्षितः स्यात् वैदेको धर्मः । तदधीनत्वात् (on it depends) वर्णाश्रमभेदानाम् वृद्धिः (multiplicity) अस्ति ।

सः भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा सम्पन्नः अस्ति । सः त्रिगुणात्मिकां (consisting of 3-constituents) वैष्णीं स्वां मायां (his Maya) मूलप्रकृतिं (material Nature) वशीकृत्य अजः अव्ययः भूतानाम् ईश्वरः नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् (even though eternally pure, conscious and free), स्वमायया (by virtue of His Maya) देहवान् इव (appears to be embodied) जातः इव (appears to be born as a man) च लोकानुग्रहं कुर्वन् लक्ष्यते (for ensuring welfare of the world) । भगवतः किमपि स्वप्रयोजनम् नास्ति सः भूतानुग्रहं एव कर्तुम् ईच्छुः अस्ति । अतः भगवान् वैदिकं धर्मद्वयं शोकमोहमहोदधौ (submerged in the great sea of grief and delusion) निमग्नाय अर्जुनाय उपदिदेश । सः धर्मः गुणाधिकैः (by men in rich excellences) गृहितः (to be grasped) अनुष्ठीयमानः (to be followed) च अस्ति । When that Dharma is received, understood and practiced by people of more than ordinary virtues, it i bound to spread like the lamp being light from abother lighted lamp.

तत् इदं गीताशास्त्रं समस्तवेदार्थसारसङ्ग्रहभूतं (collection of the essence of all the teachings of the Vedas) दुर्विज्ञेयम् (sense is difficult to grasp) अस्ति । अहं (शङ्कराचार्यः) विवेकतः अर्थनिर्धारणार्थं (for settling the meaning) संक्षेपतः विवरणं करिष्यामि ।

तस्य अस्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं निःश्रेयसं (knowing true self via inward meditation-Nivrutti) सहेतुकस्य (with causes) संसारस्य (transmigratory life) अत्यन्तोपरमलक्षणम् (indicating total cessation) अस्ति । तच्च सर्वकर्मसन्यासपूर्वकात् (preceeded by renunciation of all works) आत्मज्ञाननिष्ठारूपात् (in the form of application of Self-knowledge) धर्मात् (law) भवति ।

अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणः धर्मः वर्णान् आश्रामांश्च उद्दिश्य विहितः (prescribed) स देवादिस्थानप्राप्तिहेतुः (higher stations of heavenly beings and so forth) अपि सन्, ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः (without desire of fruits) । शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण (by becoming fit for practicing discipline of knowledge) ज्ञानोत्पत्तिहेतुकत्वेन च निःश्रेयसहेतुत्वम् अपि प्रतिपद्यते (followed) भ.गी-५-१०, ५-११ । तथा चेमम् एव अर्थम् अभिसंधाय (promise) वक्ष्यति - 'ब्रह्मण्याधाय कर्माणि - भ.गी-५-१०, 'योगिनः कर्म कुर्वन्ति सङगं त्यक्त्वात्मशुद्धये - भ.गी-५-११ ।

अभ्युदयः (प्रवृत्तिलक्षणः धर्मः ईश्वरार्पणबुद्ध्या फलाभिसन्धिवर्जितः)
--> सत्वशुद्धिः --> सर्वकर्मसन्यासः (आत्मज्ञाननिष्ठारूपः) --> ज्ञानप्राप्तिः --> निःश्रेयसः
अभ्युदयः (प्रवृत्तिलक्षणः धर्मः फलाभिसन्ध्या) ----> देवादिस्थानप्राप्तिः

इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनं (aimed at spiritual freedom), परमार्थतत्त्वं (highest) च वासुदेवाख्यं (as Vadudeva) परब्रह्माभिधेयभूतं (expressing the ultimate truth that is Brahman) विशेषतः (especially) अभिव्यञ्जयत् (equipped with) विशिष्टप्रयोजनसम्बन्धाभिधेयवत् (specific objective, relation and content) गीताशास्त्रम् । यतः तदर्थविज्ञाने (its mastery) समस्तपुरुषार्थसिद्धिः (leads to achieving all the values of life) । अतः तद्विवरणे यत्नः क्रियते मया (आदि शङ्कराचार्येण) ।

चत्वारः अनुबन्धाः १. विषयः (subject matter) २. प्रयोजनः (necessity for its study)
३. अधिकारिः (competency of the student) ४. सम्बन्धः (connection of the subject matter with the book (Vedantasara).